# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०२ सेमेस्टर-०३** | **प्रश्नपत्रम्- ०८** | गुणाः - ७० |
| विषयः – फलितज्योतिषम् | कोड – CE-2.3.6 | समयः – ०३:०० तः ०६:०० |
| दिनाङ्कः – ०२/१२/२०१६ | ग्रन्थः – बृहज्जातकम् | |

**प्रथमान्वितिः (युनिट - १)**

**प्रश्नः १ अधोलिखितयोः कस्यश्चित् द्वव्योः व्याख्यां कुरुत्** **०८**

(१) कालाङ्गानि वराङ्गमाननमुरो हृत्कोऽवासोभृतो वस्तिर्व्यञ्जनमूरुजानुयुगले जङ्घे ततोऽङ्घ्रिद्वयम्
मेषाश्विप्रथमा नवर्क्षचरणाश्चक्रस्थिता राशयो राशिक्षेत्रगृहर्क्षभानि भवनं चेकार्थसमप्रत्ययाः ॥

(२) हेलिस्सूर्यश्चन्द्रमाश्शीतरश्मि र्हेम्ना विद् ज्ञो बोधनश्चेन्दुपुत्रः ।
आरो वक्रः क्रूरदृक् चावनेय: कोणो मन्दः सूर्यपुत्रोऽसितश्च ॥

(३) क्रियः शिरो वक्त्रगलो द्वितीय: पादांसके पृष्ठमुरोऽथ पार्श्वे
कुक्षिस्त्वपानोऽङ्घ्रयथ मेढ्रमुष्कौ स्फिक् पुच्छमित्याह चतुष्पदाङ्गे ।

**प्रश्नः २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्य उपरि निवन्धं लिखत** **०८**

(१) ग्रहभेदाध्याय: ।

(२) राशिप्रभेदाध्यायः ।

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य उपरि टिप्पणीं लिखत ।** **०२**

(१) कालरूपपुरुषस्य अङ्गानि ।

(२) ग्रहाणां स्वामीवर्णयो: वर्णनम् ।

**प्रश्नः ४ अधोलिखितेषु कयोश्चित् द्वयोः अतिलघूत्तरं लिखतु ।** **०२**

(१) कृष्णवर्णस्य स्वामी कः ?

(२) भौमः कस्मिन् राशौ कति अंशपर्यन्तम् उच्च: भवति?

(३) रात्रिबलिराशय: कः ?

(४) स्थानबलि किं कथ्यते ?

**द्वितीयान्वितिः (युनिट - २)**

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयो व्याख्या कुरुत** **०८**

(१) शशिन्यरिविनाशगे निधनमाशु पापेक्षिते शुभैरेथ समाष्टकं दलमतश्च मिश्रेक्षिते ।
असद्भिरवलोकिते बलिभिरत्र मासं शुभे कलत्रसहिते च पापविजिते विलग्नाधिपे ॥

(२) आयुः कृत येन हि यत्तदेव कल्प्या दशा सा प्रबलस्य पूर्वा ।
साम्ये बहूनां बहुवर्षदस्य तेषां च साम्ये प्रथमोदितस्य ॥

(३) स्वादर्कः प्रथमायबन्धुनिधनव्याज्ञातपोद्युनगो वक्रात् स्वादिव तद्वदेव रविजाच्छुक्रात्स्मरान्त्यारिषु ।
जीवाद् धर्मसुताय्शत्रुषु दशत्र्यायारिगः शीतगो स्तेश्वेवान्त्यतपस्सुतेषु च बुधालग्नत् सबन्ध्वन्त्यगः ॥

**प्रश्नः ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्याध्यायस्य सारांशं लिखन्तु ।** **०८**

(१) अरिष्टाध्यायः ।

(२) अष्टकवर्गाध्याय:।

**प्रश्नः ७ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** **०४**

(१) अरिष्टयोगद्वयम्। (२) परमायु योगः।

(३) अमितायुयोगः। (४) सूर्यदशाविचारः।

**प्रश्नः ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** **०५**

(१) अश्वस्यपरमायुः कति?

(२) कुलीरस्य पर्यायवाचि शब्दः कः ?

(३) सूर्यस्य शुभदशाफलं किम्?

(४) गुरोः अशुभदशाफलं किम्?

(५) अष्टकवर्गे कति ग्रहाः ग्राह्याः ?

(६) संयोगाष्टवर्गफलं किम्?

(७) लग्नचन्द्राभ्यां दशमस्थः सूर्यः केन द्वारा धनप्राप्तिः कारयति ?

## तृतीयान्वितिः (युनिट - ३)

**प्रश्नः ९ अधोलिखितेषु क्योश्चिद् द्वयोः व्याख्यां कुरुत** **०८**

(१) कुजे तुङ्गेऽर्केन्द्वोर्धनुषि यमलग्ने च कुपतिः पतिर्भूमेश्चान्यः क्षितिसुतविलग्ने सशशिनि।
सचन्द्रे सौरेऽस्ते सुरपतिगुरौ चापधरगे स्वतुङ्गस्थे भानावुदयमुपजाते क्षितिपतिः।

(२) गुरुबुधसितलग्ने सप्तमस्थेऽर्कपुत्रे वियति दिवसनाथे भोगिनां जन्म विद्यात्।
शुभबलयुतकेन्द्रैः क्रूरभस्थैश्च पापै- र्व्रजति शबरदस्युस्वामितामर्थभाक् च॥

(३) ईर्ष्युर्विदेशनिरतोऽध्वरुचिश्च रज्ज्वां मानी धनी च मुसले बहुकृत्यसक्तः।
व्यङ्गस्थिरार्थनिपुणो नलजः स्त्रगुत्थो भोगान्वितो भुजगजो बहुदुःस्वभाक्स्यात्॥

**प्रश्नः १० अधोलिखितयोः प्रश्नयोः कस्यचिदेकास्य उत्तरं सविस्तरं लिखतु।** **०८**

(१) यवनाचार्यमतानुसारेण राजयोगाः।

(२) चन्द्रयोगाध्यायस्य प्रतिपाद्यविषयाः।

**प्रश्नः ११ निम्नलिखितयोः कस्यचिदेकस्य उपरि टिप्पणीं लिखतु।** **०४**

(१) त्रिविधराजयोगाः।

(२) आश्रययोगस्य परिचयः।

(३) नाभसयोगस्य विचारः।

**प्रश्नः १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूतरं यच्छत।** **०५**

(क) उपचयस्थानानि कानि ?

(ख) त्रिकोणस्थानानि कानि ?

(ग) राज्यप्राप्तिकालः कदा भवति ?

(घ) शकटयोगस्य फलं किम्?

(ङ) मुसलयोगस्य फलं किम्?

(च) केमद्रुमयोगः कथं भवति?

(छ) सुनफायोगफलं लिखतु

***